# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 24-08-2014 | अङ्काः–100

पूर्वाह्ने – 10-00 तः 1-00 पर्यन्तम् | समयः–घण्टात्रयम्

**1 एकवाक्येन संस्कृतभाषया उत्तरं लिखत । (अष्टानामेव)** 8

1. गणेशं के नमस्कुर्वन्ति ?
2. बालिकायाः हस्ते किमासीत् ?
3. अचक्षुषां चक्षुः कः ?
4. शुकशावकयोः नाम किम् ?
5. एकलव्य कः ?
6. कीदृशः पुरुष न किञ्चित्कर्तुमर्हति ?
7. शङ्कराचार्यस्य मातापितरौ कौ ?
8. छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?
9. किं न साधवो विस्मरन्ति ?
10. अमरशक्तेः पुत्राः कीदृशाः ?

**2 वाक्यद्वयेन संस्कृते उत्तरं लिखत । (पञ्चानामेव)** 10

1. कीदृशौ सुतौ वरम् ?
2. वायसः व्याधं दृष्ट्वा किं अचिन्तयत् ?
3. हनूमान् समुद्रस्योपरि किं किं चकार ?
4. ब्राह्मणपुत्रः दीनारकम् दृष्ट्वा किं चिन्तितवान् ?
5. गृहिणी द्विजं किमवदत् ?
6. गोप्यानि कानि ?



पश्चादनुवर्तते

3 **संस्कृतभाषया पञ्चषैः वाक्यैः उत्तरं लिखत । (त्रयाणामेव)** 9

1. शङ्कराचार्यस्य शिष्याः के ? कुत्र कुत्र तैः मठाः स्थापिताः ?
2. विष्णुशर्मणः प्रतिज्ञा का ?
3. मल्लस्य सामर्थ्यं विशदयत ।
4. विष्णोराकारं विवृणुत ।

4 **मातृभाषया उत्तरं लिखत । (त्रयाणामेव)** 12

1 कालिदासेन कृतम् समस्यापूरणप्रसङ्गम् विवृणुत ।
2. एकलव्यः अस्त्रविद्याभ्यासं कथम् अकरोत् ? गुरुदक्षिणार्थं सः द्रोणाय किं दत्तवान् ?
3. केषां मतिः क्षीयते ? सोदाहरणं विवृणुत ?
4. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

5 **स्वेष्टभाषायां सन्दर्भं सूचयत । (चतुर्णामेव )** 12

1. मुखरस्तत्र हन्यते ।
2. अस्ति विष्णुशर्मो नाम भूसुरः ।
3. रणे रावणं हत्वा त्वां नेष्यति ।
4. कुतो विद्यार्थिनः सुखम् ?
5. तदनन्तरं यद्भावि तद्भवतु ।

6 **द्वयोः अन्वयानुसारार्थं स्वेष्टभाषया लिखत ।** 4

1. तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
   तुरासाहं पुरोधाय स्वायंभुवं ययुः ।।

2. विद्यया विमलयाप्यलङ्कृतो
   दुर्जनः सदसि मास्तु कश्चन ।
   साक्षरा हि विपरीततां गताः
   केवलं जगति ते राक्षसाः ।।

3. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ।।

**7 श्लोकद्वयं पूरयत ।** 4

1. दोर्भियुक्ता ......................।........................ सुप्रसन्ना ।।
2. प्रथमवयसि .......................।.................... विस्मरन्ति ।।
3. जयन्ति ते ...........................।...................... भयम् ।।

**8 भाषान्तरम् कुरुत ।** 5

एकदा प्रोणस्याज्ञया कौरवपाण्डवाः मृगयां कर्तुं वनमगच्छन् । तेषु मृगयां कुर्वत्सु कश्चित् सारमेयः अपरिचितम् एकलव्यम् दृष्ट्वा अभषत् । अनुपदमेव स भषतः शुनो मुखे सप्तशरानपूरयत् । स श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत् । स तु तं विलोक्य विस्मितः अभवत् ।

**9 रिक्तस्थानं पूरयत ।** 4

1. यदि मे शिष्योऽसि तर्हि .................. देहि ।
2. अतिथिसत्कारः ..................... ।
3. मनुष्याणां ................. शरीरस्थो रिपुः ।
4. आहारशुद्धौ .................... ।

**10 समानार्थकपदं लिखत । (त्रयाणामेव)** 3

1. गलः 2. प्रथितः 3. धरणी 4. अनुपदम्

**11 विरुद्धार्थकपदं लिखत । (त्रयाणामेव)** 3

1. सूक्ष्मः 2. बन्धनम् 3. सन्तुष्टः 4. प्राक्

**12 वाक्यदोषं परिहरत । (त्रयाणामेव)** 3

1. रामस्य सह क्रीडामि ।
2. तस्य त्रयः पुत्राः आसीत् ।
3. भ्रातरौ भोजनं कुर्वन्ति ।
4. व्याधः ते शुकौ व्यक्रीणात् ।



पश्चादनुवर्तते

13 **वाक्ये योजयत । (त्रयाणामेव)** 3

1. आह्वयति 2. श्रुत्वा 3. तस्य 4. अन्तिकम्

14 **क्रियापदमेकं पुरुषत्रये लिखत ।** 3

1. अब्रवीत् 2. वेत्ति 3. क्षीयते

15 **सन्धिं विभज्य नाम लिखत ।** 3

1. अथैकस्मिन् 2. तैरुक्तम् 3. वाङ्मयम्

16 **लोकोक्तिमेकां पूरयित्वा अर्थं विवृणुत ।** 3

1. चक्रारपंक्तिः ............................................ ।

2. यादृशं ...................................................... ।

17 **द्वयोः प्रयोगं परिवर्तनं कुरुत :-** 3

1. सः पूजां न कृतवान् ।
2. मया सः शुश्रूषितः ।
3. नाहं विद्या विक्रयं करोमि ।

18 **व्याकरणविशेषं सूचयत :- (एकस्य)** 2

1. रामाय नमः । 2. करोति स्म ।

19 **समूहेतरपदं चिनुत :-** 3

1. सर्पः, भुजङ्गमः, भुजगः, वल्मीकः
2. पद्मम्, शुकम्, त्रिशूलम्, पुस्तकम्
3. वसतु, वन्दते, निन्दतु, कुर्वन्तु

20 **कर्तृ-कर्म-क्रियापदं लिखत :-** 3

1. भवति, भिक्षां देहि ।
2. बालिकायाः हस्ते पुस्तकम् आसीत् ।
3. देवाः पुष्पवृष्टिं अवर्षन् ।

* * *